# धर्मशास्त्रे वर्णिताया दायविभागव्यवस्थायाः समीक्षा

दामोदरगौतमः
सहप्राध्यापकः - धर्मशास्त्रविभागः
नेपालसंस्कृतविश्वविद्यालयः
पिण्डेश्वरविद्यापीठम्, धरानः नेपालः
gdamodar797@gmail.com

Article History : Received - 17 April 2026, Reviewed - 08 May 2026, Accepted - 16 June 2026
DOI : https://doi.org/10.3126/ss.v4i05.96261

**लेखसारः**

पितृपितामहादिभ्यः पुत्रपौत्रादिषु यद्धनं आयाति तद्दायशब्देन व्यवह्रियते । सप्त वित्तागमाधर्म्या दायो लाभः क्रयो जयः प्रयोग कर्मयोगश्च सत्प्रतिग्रह एव च इति धर्मशास्त्रीयवचनानुसारेण सम्पत्तिरागमनस्य प्रमुखस्रोतस्सु परम्परया पितृमातृशकासात् प्राप्तं धनं दाय इति कथ्यते। दायो द्विविधः- अप्रतिबन्धः सप्रतिबन्धश्च। पितृणां धनं पुत्रपौत्रादिषु अनायासेन यद्गच्छति तद्भवति अप्रतिबन्धो दायः। पितृव्यस्य भ्रात्रादीनां वा सगोत्राणां उत असगोत्राणां मातुलादीनां वा धनं तेषां पुत्राभावेण यदि आयाति चेत् स प्रतिबन्धदायः। दायविभागश्च पितुः मातुर्वा स्वामित्वे स्थितस्य स्थावरधनस्य जङ्गमधनस्य वा पुत्रेष्वेकस्वामित्वव्यवस्थापनम्। स च पितुः मातुर्वा मरणोपरान्तम्, पितुरिच्छया पुत्रेच्छया वा अवस्थानुसारेण कर्तुं शक्यते । परं केषाञ्चिन्मते पितृमात्र्यादिषु जीवितेषु पुत्रादीनां तत्रेश्वरत्वं न भवतीत्यपि वचनमस्ति, ते प्राहुः- ऊर्ध्वं पितृतो दायविभाग इति। पितृषु उपगतेषु पितृद्रव्याणां पुत्र-पौत्र-प्रपौत्रादिषु चतुर्थवंशपर्यन्तेषु सन्ततिषु अंशभाग्त्वं अर्हतीति। तथा चाचार्याः प्राहुः- पितर्युपगते पित्रोः रिक्थं ऋणादिकं वा समानतया विभज्य पुत्रा गृह्णीयुरिति। दायविभागे ज्येष्ठाय ज्येष्ठभागम्, मध्यमाय तदर्धभागम्, ततोऽनुजेभ्यः तदर्धभागक्रमेण च कँञ्चिद् सम्मानभागं वितीर्य तदवशिष्टं धनञ्च पुनः समभागेन सर्वेषु विभजेद् अथवा सम्मानभागस्य विभाजनं विनैव सकलपुत्रेच्छया दायान् विभक्तुमपि शक्यत इति केषाञ्चन आचार्याणां मतं वर्तते ।

**शब्दकुञ्जिका -** अतिप्रतिबन्धदायः, प्रत्ता, सत्प्रतिग्रहः, सप्रतिबन्धदाय।

**विषयप्रवेशः**

पितृ-पितामह-प्रपितामहादिभ्यो वंशपरम्परया समागतं स्थावरं जङ्गमादिकं वा यद् धनं तस्य नाम दायः। दायोऽयं कथं केन च प्रकारेण विभज्यत इति प्रकृतानुसन्धानस्योद्देश्यम्। दायस्य विभागः पितृषु जीवितेषु विधेय उत दिवङ्गतेषु इत्यत्र आचार्येषु वैमत्यं दृश्यते । अत्र मतद्वयं प्राप्यते । जीवितावस्थायां विभागपक्षेऽपि मतद्वयमस्ति- पितुरिच्छया विधीयेत उत पुत्रेच्छया इति पक्षोऽपि वर्तते। ऊर्ध्वं पितुश्च मातुश्च इति आचार्यवचनानुसारेण पित्रोः मरणानन्तरमेव पुत्राणां दायविभागेऽधिकार इति। यदि पिता धर्मवृद्ध्यर्थं पुत्रेषु दायविभागमिच्छति चेत् तदीहयापि कर्तुं शक्यत इति पितुरिच्छया दायविभाग इति विभागस्य द्वितीयप्रकारः। धर्मशास्त्रे मातू रजोनिवृत्त्यनन्तरं भगिन्यादीनां विवाहे च सम्पादिते सति दायविभागं कर्तुं शक्यत इति व्यवस्थापि वर्तते- तथा चोक्तं- मातुः निवृत्ते रजसि प्रत्तासु भगिनीषु च

इति। अयञ्च दायविभागस्य तृतीयपक्षः। दायविभागात् प्राप्तेषु धनेषु विक्रयाधिकारः तस्मिन् भवति। स आत्मनि स्थितं स्वत्वं यं कमपि विक्रेतुं शक्नोति। तथाविधं स्वत्वं द्विविधं भवति- अप्रतिबन्धत्वं सप्रतिबन्धत्वञ्च। अप्रतिबन्धत्वं स्वत्वं पित्रोः मरणाणनन्तरं एकस्मिन् पुत्रे वर्तमाने स्वत आयाति। । बहुषु भ्रातृषु विद्यमानेषु दायविभागान्तरं यद् द्रव्यं आयाति तस्मिन्नेव स्वत्वाधिकारः प्रतिपद्यते। सप्रतिबन्धदायस्तु पितृव्यस्य भ्रातृणां वा अपुत्रत्वेन तदनन्तरं प्राप्तं स्थावरं जङ्गमादिधनं वा भवति। प्रपितामहादिभिरेव दायविभागेऽकृते तु जीवितानां पितृणां सङ्ख्यानुसारेण जीवितानां चतुर्थवंशपर्यन्तानां अंशाधिकारिणां पुत्रपौत्रादीनां सङ्ख्यानुसारेण वा दायं विभजेदिति आचार्यमतम्, यतो हि चतुर्थवंशपर्यन्तानां पुत्रपौत्रादीनां दायाधिकारत्वं पिण्डाधिकारत्वञ्च शास्त्रे वर्णितमस्ति। प्रकृते विषये प्राचीनशास्त्रेषु वर्णनेषु विद्यमानेष्वपि अधुना तद्विषये चर्चा न प्राप्यते। नेपालदेशीयेन मुलुकी ऐन (वि.सं.१९१०) इत्याख्येन विधानेन दायविभागविषये कृतासु व्यवस्थासु च धर्मशास्त्रे वर्णितया व्यवस्थया सह कियत् पार्थक्यमस्तीति अनुसन्धेयो विषयः। धर्मशास्त्रेण प्रतिपादितो विषयोऽपि अधुना लोके प्रयुज्यमानोऽस्ति न वेति इत्यपि संशयापन्नविषय एव । अतः एतेषु विषयेषु अध्ययनं आवश्यकमिति विचार्य तस्मिन् विषये केन्द्रितो भूत्वा लेखोऽयं प्रकल्प्यते। अतोऽत्र निम्नानुसारं शोधप्रश्ना उपस्थाप्यन्ते ।

**शोधप्रश्नाः**

क) धर्मशास्त्रेषु दायविभागव्यवस्थाविषये किं किं वर्णितं प्राप्यते ?

ख) तत्र वर्णितानां दायविभागव्यवस्थानां अध्ययनं कथं कर्तुं शक्यते ?

ग) तत्र वर्णितानां दायविभागव्यवस्थानां मूल्यं किम् ?

**उद्देश्यकथनम्**

क) धर्मशास्त्रेषु वर्णिताया दायविभागव्यवस्थायाः समुल्लेखः,

ख) तत्र वर्णितानां दायविभागव्यवस्थानां अध्ययनपद्धतिनिर्धारणम्,

ग) तत्र वर्णितानां दायविभागव्यवस्थानां मूल्यसमुल्लेखः ।

## अध्ययनविधिः सीमा च

अत्र पुस्तकालयस्थानां सामाग्रीणां प्रयोगो विद्यते। मनु-याज्ञवल्क्य-नारदादिस्मृतिषु वर्णितानां कौटिल्यार्थशास्त्रस्थे दायभागे समुल्लिखितानां सामग्रीणाञ्चाध्याहारोऽस्मिन् लेखे विहितोऽस्ति । तथैव नेपालदेशीयं मुलुकी ऐन (१९१०) इत्यस्य व्यवस्थाञ्च आश्रित्य लेखोऽयं निर्मितोऽस्ति । तेभ्यः मधुकरपद्धत्या अन्येभ्यश्च स्रोतोभ्यः सामग्रीर्गृहीत्वा ताः व्याख्या-वर्णनविश्लेषणादिभिरत्र विश्लिष्यते। तथाविधैर्विधिभिः प्रक्रियाभिश्च व्याख्यान-विश्लेषणादिकं परस्परतोलनञ्च विधाय तस्माद् वस्तुतथ्यात्मको निष्कर्षो निष्पाद्यते । अत्र सामग्रीविश्लेषणे प्रायो निगमनात्मको विधिरुपयुज्यते। एवमेव सन्दर्भाङ्कने तथा सन्दर्भसामग्रीसूचीनिर्माणे प्रायो लेखकमितिपद्धतिः (APA 7th ed.) प्रयुज्यते। तथापि तया सह प्रकृतिवैपरीत्येषु स्थानेषु संस्कृतस्य परम्परिता पद्धतिरपि प्रयुज्यते ।

प्रकृतलेखस्य सीमा मनुस्मृतेर्नवमाध्यायस्य दायभागः, याज्ञवल्क्य-नारदादिस्मृतिषु, कौटिल्यार्थशास्त्रे च समुल्लिखिताः दायविभागाः सन्ति । तथैव नेपालदेशीयं मुलुकी ऐन (१९१०) इति च वर्तते,अत इतो भिन्नानां ग्रन्थनियमादीनामनुल्लेखः प्रकृतलेखस्य सीमा वर्तते ।

## विषयविश्लेषणम्

असंसृष्टं विभजनीयं धनमेव दायो न भवति, अपि तु लाभाद्यर्थसंसृष्टं धनं व्यावृत्तयेद् पदं संसृष्टमिति । वणिग्भिरेकीकृत्य विभज्यमाने तद् दायभागः प्रयोगः । एवं वक्षमाणः पारिभाषिकसंसर्गवतोऽपि दायशब्दः।

पितृद्वाराऽऽगतं द्रव्यं मातृद्वाराऽऽगतं च यत् ।
कथितं दायशब्देन तद्विभागोऽधुनोच्यते ॥
विभक्तव्यं पितृद्रव्यं दायमाहुर्मनीषिणः । (व्यवहारमयूखः, पृ.५८)
विभागोऽर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते ।
दायभाग इति प्रोक्तः तद्विवादपदं बुधैः ॥ (वीरमित्रोदयः, पृ. ४११) ।

स्वामिसम्बन्धाद् निमित्ताद् वा यद्धनं स्वसम्बन्धे समागच्छति तद्धनं दाय उच्चते। मनुः पुत्रेभ्यो दायं व्यभजद् इति तैत्तिरीयसंहितावाक्यमुद्धरन् काणेनामकाचार्यो धर्मशास्त्रस्येतिहासनिबन्धे समुल्लिखति (पृ.८३७) । तस्माद्यः पुत्राणां दायं धनतममिवोपैति तं मन्यन्ते यमेवेदं भविष्यतीति (ध.इ.८३७) । उपेया दैव में दायं तेन वै त्वोपमन्त्रय इति (ऐ.बा.३३/५) । एष वः कुशिका वीरो देवरातस्तमन्वित । युष्मांश्च दायं म उपेता विद्यां यामु च विद्मसि (ऐ. ब्रा. ३३/६) । पितृसकाशात् पुत्रत्वेन प्राप्तं धनं मातृः सकाशात् प्राप्तधनं पुत्र: पौत्रत्वेन प्राप्तं धनं दायशब्देन अभिधीयते । पितृद्रव्यं विभक्तव्यम् इत्यत्रानेकेषु पुत्रेषु स्थितेषु सति विभक्तव्यम्, एक एव पुत्रे स्थिते दायशब्द अप्रयोजकः । पितुः स्वामित्वे स्थिते स्थावरादिरिक्थेऽनेकैः पुत्रैर्दायभागः कर्तव्यः। विभागः शब्दस्यार्थः पितृ-पितामह-प्रपितामहेभ्य आगतं द्रव्यं (रिक्थं) पुत्र-पौत्र-प्रपौत्रैः दायभागः कुर्यादिति । 'न जामये तान्वो दायं रिक्थं मारैक् चकार गर्भः सनितुर्निधानम्' इति वैदिकवाक्यानुसारेण पितृधने पुत्राणां दायविभागेऽधिकारः, कन्यानां नाधिकारः । पितुः सम्पत्तिः पुत्रैर्विभागकरणं दायशब्देन व्यवह्रियते । दीयत इति दायः, एतया व्युत्पत्त्या तन्न । दायशब्दो ददाति प्रयोगश्च गौणः । मृते प्रव्रजितादिस्वत्वनिवृत्तिपूर्वकपरसत्वोत्पत्तिरिति फलसाम्यात् । न तु मृतादीनां तत्र त्यागोऽस्ति । ततश्च पूर्वस्वामिसम्बन्धाधीनं तत्स्वाम्योपरमे तस्य द्रव्ये स्वत्वं तत्र निरुढो दायशब्दः पितुर्मरणोपरान्तेऽपि दायभागो भवति। पितृद्रव्यादविभक्तोपगतानां पुत्रपौत्रप्रपौत्रा वा आचतुर्थादि अंशभाजः। तावद्विच्छिन्न: पिण्डो भवति। विच्छिन्नपिण्डाः सर्वे समं विभजेरन् इति। पितृ-पितामह-प्रपितामहेभ्य आगतं द्रव्यादिकं चतुर्थपुरुषपर्यन्ताः पुत्रादय अंशभाजाधिकारिणो भवन्ति, चतुर्थपुरुषपर्यन्तमविच्छिन्नपिण्डो भवति, अतो दायोऽपि पिण्डानुगामी।

पितृद्वारागतं द्रव्यं मातृद्वारागतं च यत्।
कथितं दायशब्देन तद्विभागोऽधुनोच्यते ॥ (व्य.म. ५८)

दायो द्विविध अप्रतिबन्ध: सप्रतिबन्धश्च। पिता-पितामह-प्रपितामहेभ्यः पुत्र-पौत्र-प्रपौत्रा यद्धनं प्राप्नुवन्ति स अप्रतिबन्धदायः। पुत्राभावेन पितृव्यानां भ्रात्रादीनां वा अन्येषां सपिण्डानामसपिण्डानां वा सम्पत्तिः यः प्राप्नोति स सप्रतिबन्धो दायः। स्वत्वं कदा भवति, जन्मना वा दायविभागानन्तरादिति विषये शास्त्रसम्मतमतेन जन्मना स्वत्वं भवति । लौकिकव्यवहारदृष्टया विभागानन्तरं स्वत्वं भवति । तत्राऽपि जन्मना स्वत्वे पुत्रः विनाधार्मिकोत्सवादिकं वा लौकिकव्यवहारे धनक्रयविक्रयादिव्ययीकर्तुं न शक्नोति । स्वत्वे लौकिके सति चौर्यादिभिर्हतं धनं धनस्वामी मम धनमिति कथितुं न शक्नोति, यस्य हस्ते धनं भवति लौकिकदृष्ट्या तस्यैव स्वामित्वमपि भवति।

योऽदत्तादायिनो हस्ताल्लिप्सेत ब्राह्मणो धनम् ।
याजनेऽध्यापनेनापि यथा स्तेन स्तथैव सः ॥ (मनु.९) ।

अदत्तदायिन चौरादागतं धनं ज्ञात्वा याजनादिकं कर्म कृत्वा प्रतिग्रहं लब्धुमिच्छति चेत् स प्रतिग्रहिताऽपि चौरतुल्यो दण्डभाग् भवेत् । स्वत्वलौकिके सति एतादृशं धनं दाता ग्रहिता च दण्डभाग् न भवेदिति। यस्य हस्ते यद्धनं तत् तस्यैव भवेत्। पितापितामहादिभ्य आगतं धनं पुत्रपौत्रादीनां जन्मनात् स्वत्त्वम्, अत्राऽपि पुत्रपौत्रस्य अनुमतिं विनैव स्थावरगृहक्षेत्रादिव्यतिरिक्तं द्रव्यं क्रयविक्रयादिविनियोगे पिता स्वतन्त्रो भवति। स्वार्जितं पित्रादिभ्यो वा प्राप्तं धनं कुटुम्बभरणपोषणार्थे धार्मिककार्यार्थे यज्ञयागार्थे पुत्रानुमतिं विनाऽपि विक्रेतुं शक्नोति ।

स्थावरं द्विपदं चैव यद्यपि स्वयमर्जितम्।
असम्भूय सुतान्सर्वान्न दानं न च विक्रयः ।।
ये जाता येऽप्यजाताश्च ये च गर्भे व्यवस्थिताः।
वृत्तिञ्च तेऽभिकाङ्क्षन्ति न दानं न च विक्रयः।। (मिताक्षरा, २६८) ।

अत्र ये जाता बालकाः सन्ति, ये च जायमानाः, ते सर्वे जीवननिर्वहणार्थं सम्पत्तिमिच्छन्ति, अतः पिता विक्रयदानादिकं कृत्वा स्थावरक्षेत्रादिसम्पत्तिं न नाशयेत्, कुलवंशपरम्परास्थापनार्थं धनमत्यावश्यकं भवति । आपत्काले-

एकोऽपि स्थावरे कुर्याद्दानाधमनविक्रयम्।
आपत्काले कुटुम्बार्थे धर्मार्थे च विशेषतः।।

पुत्रा अप्राप्ते व्यवहारे षोडशवर्षे न्यूने सति वा पुत्राणामनुमतिं विनैव पिता स्थावरादिसम्पत्तिं दानविक्रयविनिमयं कर्तुं शक्नोति, यद्यपि-

स्वग्रामज्ञातिसामन्तदायादनुमतेन च।
हिरण्योदकदानेन षड्भिर्गच्छति मेदिनी।।

ग्रामबान्धवानां ज्ञातीनां ग्रामसामन्तानां साक्षित्वेन ग्रामाधिकारिणामध्यक्षादीनां वानुमत्या स्थावरादिद्रव्यं व्ययीकर्तुं शक्नोति। उपर्युक्तप्रमाणेन स्वत्वं लौकिकं शास्त्रीयञ्चास्थानुसारेण द्वयमपि सिद्धं भवति। प्रपितामह-पितामह-पितृसकाशात् परम्परया प्राप्तं स्थावरजङ्गमादिद्रव्यं पुत्रा दायविभाजनं कर्तुं शक्नुवन्ति। पितरः पुत्रे जाते हर्षोल्लासेन प्रशंसन्ति।

पिता पितामहश्चैव तथैव प्रपितामहः ।
जातं पुत्रं प्रशंसन्ति पिप्पलं शकुना इव । (वीर. ४६१)।

दायं हरति, पिण्डदानञ्च करोति इत्युद्देश्येन पिप्पलफलं दृष्ट्वा पक्षिगणा यथा प्रशंसन्ति तथैव पितृगणाः पुत्रपौत्रप्रपौत्रान् दृष्ट्वा प्रशंसन्ति ।

दायविभाजनं कदा कथं च क्रियते इति जिज्ञासायाम् -

ऊर्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः समम्।
भजेरन्पैतृकं रिक्थमनीशास्ते हि जीवतोः।। (मनु ९।१०४)

पित्रोः जीवतयोस्तेषां धने पुत्राणां नाधिकारः, यतो हि पित्रोर्मरणोपरान्ते सर्वान् भ्रातृन् समेत्य पैत्रिकं रिक्थस्थावरजङ्गमादिकं दायं विभजेत्, जीविते सति तु नाधिकारः। पिता स्वेच्छया विभागं करोति चेत् इच्छानुसारं ज्येष्ठाय जेष्ठाशं समं वा विषमं भागं स्वेच्छया विभागं कुर्यात्, तत्र समानांशस्य प्रतिबन्धो नास्ति।

विभागं चेत्पिता कुर्यादिच्छया विभजेत्सुतान् ।
ज्येष्ठं वा श्रेष्ठभागेन सर्वे वा स्युः समांशिनः।। (याज्ञ-११७) ।

अनीश्वराः पितृमन्तः स्थितपितृमातृकाः पुत्राः। तेषां ऊर्ध्वं पितृतो पितृद्रव्याणां दायविभाग इति कौटिल्यः। अत्रापि अनीश्वरा अधिकारविहीनाः पितृमन्तः पितरि उपरते सति दायविभागं कर्तुं पुत्राः स्वतन्त्रा भवन्ति।

पितर्युपरते पुत्रा विभजेरन् पितुर्धनम्।
अस्वाम्यं हि भवेदेषां निर्दोषे पितरि स्थिते।। (देवलः, कृत्यकल्पतरुः)

देवलोऽपि पितुर्मरणोपरान्तमेव दायभागं विभजेदिति उक्तवान्। पितरि निर्दोषे पतितादिमहापातक- उपपातकादिदोषरहिते पितु उपरते दायविभागः। दोषयुक्ते पितरि सति तु पुत्रेच्छया दायभागं कर्तुं शक्यते। जीवति पितरि पुत्राः क्षेत्रगृहदानादिषु न स्वातन्त्र्याः। पितरि प्रव्रजिते प्रोषिते वा ज्येष्ठपुत्र एवार्थं चिन्तयेत्।

पितर्यशक्ते कुटुम्बव्यवहारादिकं ज्येष्ठपुत्रः कुर्यादनन्तरो वा कार्यज्ञस्तदनुमतेन। न त्वकामे पितरि ऋक्थविभागः। वृद्धे विपरितचेतसि दीर्घरोगिणि वा पितरि सति ज्येष्ठ एव पितृवत् पालयेदितरान् (शङ्खलिखितौ, कृत्य-६५१) अत ऊर्ध्वे पितरि पुत्रा विभजेयुर्धनं समम्।

मातुर्निवृत्ते रजसि प्रत्तासु भगिनीषु च।। (नारद व्यवहार म. ५९) अत्राऽपि पितुः मरणोपरान्ते मातुः रजसि निवृत्तेऽन्यसन्तानोत्पत्त्यसम्भवात्। पिता सन्यासग्रहणकाले पुत्रेषु धनं विभजेत्। न जीवति पितरि पुत्राः रिक्थं भजेरन्। यद्यपि स्वाम्यं पश्चादधिगतं तैरनर्हा एव पुत्रा अर्थधर्मयोरस्वातन्त्र्यादिति। (वीरमित्रोदयः ४१४) तत्र पित्रोरभावे भ्रातृणां विभागः सम्प्रदर्शितः।

मातुर्निवृत्ते रजसि जीवतोरपि शस्यते।। (बृहस्पतिः व्यव.मः ५३)
व्याधितः कुपितश्चैव विषयासक्तमानसः
अन्यथाशास्त्रकारी च न विभागे पिता प्रभुः। (नारद व्या.म ५९)

व्याधितो दीर्घरोगेण ग्रस्तः, अतिक्रोधी, भोगविलासे निर्लिप्तः, कामवासनासक्तः, अन्यथाशास्त्रकारी स्वधर्मपरित्यक्तः परधर्मोपासकः, एतादृग् व्यसनयुक्तः पिता दायविभागाय न समर्थोऽयोग्यो भवतीति शास्त्रमतम्। स पुत्रेच्छया दायविभागं करोति चेद् ऊर्ध्वं पितुश्च मातुश्च वा मातुः निवृत्ते रजसि इति नियमविपरीतं दायविभागोऽसम्भवः। धार्मिककृत्यविस्तारार्थं पितुरिच्छया विभाजिते स्वेच्छया विभागो भवति।

एवं सह वसेयुर्वा पृथग्वा धर्मकाम्यया।
पृथग्विवर्धते धर्मस्तस्माद्धर्मः पृथक्क्रिया।। (मनु-९.११)।।
एकपाकेन वसतां पितृदेवद्विजार्चनम्।
एकं भवेद्विभक्तानां तदेव स्याद्गृहे गृहे।। (बृहस्पतिः)।।

धर्मवृद्धिकामनया पृथग् भवेद् एकस्मिन् गृहे पाञ्चायनदेवतापूजनम्, पितृश्राद्धादिकं कर्म च एकमेव भवति, दायविभक्ते पृथक् पृथग् गृहे देवपितृश्राद्धादिकं भवति, गेहे गेहे पाञ्चायनदेवतापूजनेन अन्ययाग-यागादिना च धर्मवृद्धिर्भवति। अतो धर्मवृद्ध्यर्थं पिता पुत्रान् दायं विभजेत्। पितुरिच्छया विभाजिते पुत्रानुसारे ज्येष्ठभागमध्यमभागो वा समांशेन वा स्वेच्छया विभजेत्।

विभागं चेत्पिता कुर्यादिच्छया विभजेत्सुतान्।
ज्येष्ठं वा श्रेष्ठभागेन सर्वे वा स्युः समांशिनः।।

ज्येष्ठस्य वंश उद्धार सर्वद्रव्याच्च यद्वरम्। ज्येष्ठाय विंशभागस्यैकं भागं दत्वा ततोऽर्धं मध्यमाय तस्याप्यर्धं यवियसे कनिष्ठाय दत्वाऽवशिष्टं धनं समांशं विभजेत्। ज्येष्ठांशं विनैव सर्वे वा स्युः समांशिनः समानांशं विभजेत् कौटिल्यो

ज्येष्ठांशं न स्वीकरोति 'जीवद्विभागे पिता नैकं विशेषयेत् न चैकमकारणानि विभजेत्।' पितुरसत्यर्था ज्येष्ठाः कनिष्ठा ननु गृह्णीयुः अन्यत्र मिथ्यावृत्तेभ्यः। ऋणरिक्थयोः समो विभागः (कौटिल्यः) यत्र ज्येष्ठभ्रातरो विभजति, तत्र विशेषो ज्येष्ठांशो न भवति। ऋणं धनं वा यदस्ति सर्वे समांशा भवन्ति।

समन्यूनाधिका भागाः पित्रा येषां प्रकल्पिताः।
तथैव ते पालनीया विनेयास्ते स्युरन्यथा॥ (बृहस्पतिः व्य.म.)
ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरम्।
ततोऽर्धं मध्यमस्य स्यात्तुरीयं तु यवीयसः॥ (मनुः. ९।११२)

पितुरिच्छया पुत्रेच्छया वा पितुर्जीविते दायभागे कृते तत्पश्चात् पुत्रे जाते स पुत्रः पितुः धनं हरेत्। ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव हरेद्धनम्। जीवति पितरि मातरि तत्सपत्न्यां वाऽवशिष्टगर्भायां विभक्तैकविभागानन्तरोत्पन्नोऽयं स्वस्माद् स्वस्माद् भागादाकृष्य स्वभागः समभागो वा कार्यः।

पितृविभक्ता विभागान्तरोत्पन्नाय स्वं विभागं दद्युरिति।
तं च भ्रातृदत्तं तद्विभागं पितैव गृहीत्वा तं परिपालयेत्॥ (वीर. ४६२)।

अकामे पितरि रिक्थभागे वृद्धे विपरीतचेतसि दीर्घरोगिणि चेति विभागेच्छारहितेऽपि विभागो भवति। विपरीतचेतसि मानसिकरोगग्रस्ते विधर्मे अन्यधर्मानुयायिनि जाते पितरि दायविभागेऽसमर्थे वा ज्येष्ठ- पुत्रानुमत्या विभागो भवति। पितरि कुटुम्बभरणपोषणायाऽसमर्थे सति ज्येष्ठपुत्रो व्यवहारं कुर्यात्। ज्येष्ठपुत्रोऽप्यसमर्थोऽस्ति चेत् तदन्तरोऽनुजः परिवारजनस्य भरणपोषणादिव्यवहारं यः करोति स ज्येष्ठानुमत्या दायभागमपि कर्तुमर्हति। धनहारिणः पुत्रा द्वादशप्रकारका भवन्ति - औरसः, पुत्रिकासुतः, क्षेत्रजः, गूढजः, कानीनः, पौनर्भवः, दत्तकः, क्रीतः, कृत्रिमः, सहोदजः, उत्सृष्टः, अपविद्ध द्वादशाः प्रकाराः पुत्राः उत्पन्नक्रमेण यथा-

औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः।
क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा॥
गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः।
कानीनः कन्यकाजातो मातामहसुतो मतः॥
अक्षतायां क्षतायां वा जातः पौनर्भव सुतः।
दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत्॥
क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः स्यात्स्वयंकृतः।
दत्तात्मा तु स्वयं दत्तो गर्भे विन्नः सहोढजः॥
उत्सृष्टो गृह्यते यस्तु सोऽपविद्धो भवेत्सुतः।
पिण्डदोंऽशहरश्चैषां पूर्वाभावे परः परः॥ (याज्ञवल्क्यस्मृतिः, १३२)

स प्रतिबन्धदायहरणक्रमः (पुत्रस्याभावे दायाधिकारी)

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा।
तत्सुता गोत्रजा बन्धुशिष्यसब्रह्मचारिणः॥
एषामभावे पूर्वस्य धनभागुत्तरोत्तरः।
स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिः॥

अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता ।
पत्न्येव दद्यात्तत्पिण्डं कृत्स्नमंशं लभेत च ॥ (वृद्धमनुः)

अपुत्रा पत्नी पतिव्रता स्थिता स्वं धर्मं पालनपूर्वकं भर्तृगृहे स्थितायां पिण्डाधिकारिणी, धनाधिकारिणी च भवति, नान्यस्याधिकारः ।

**निष्कर्षः**

मनुस्मृतिमतमवलम्ब्य ऊर्ध्वं पितुश्च मातुश्च भजेरन् पैत्रिकं रिक्थं अनिशास्तेहि जीवतो विभजेरन्सुताः पित्रोरुर्ध्वं रिक्थंमृर्णं समम्। पित्रोर्मरणानन्तरं सर्वे पुत्राः समेत्य ऋणं धनं च विभजेयुः। पितरि जीविते दायविभाजने पुत्राणां नाधिकारः । ऋणमपाकृत्य धनं समं विभजेत् । मातुर्धनं दुहितारो विभजेयुः । मातृकृतमृणं पुत्रैरपाकरणीयम् । दुहितृणामभावे मातुर्धनं पुत्रा गृह्णीयुः। षोडशवर्षाद् न्यूनेष्वप्राप्तव्यवहारेषु पुत्रेषु प्रोषितेषु वा तेषां धनानि मातृबान्धवानां मातुलादीनां ग्रामसामन्तादीनां वा संरक्षणे स्थापयेयुः, यावद् अप्राप्तव्यवहारः। स्वर्यातस्यापुत्रस्य भ्रातृगामिधनं तदभावे पितृव्यः पत्नी वा हरेत्। बहुधने स्वर्याते भरणपोषणोपयुक्तं धनं पत्नी गृह्णाति, शेषं धनं भ्रातरो गृह्णन्ति। उपर्युक्तायां दायविभाजनव्यवस्थायां पित्रोर्मरणानन्तरमेव दायविभाजनं क्रियते । एतादृश्यां व्यवस्थायामेवास्माकं नेपालदेशे ग्रामवासिनो नगरवासिनः कृषका वणिज राजसेवका वृद्धवृद्धाश्च सर्वेऽपि सुखेन सन्तुष्टेन च जीवनयापनं कुर्वन्ति । अतः सर्वकारः नियमतः पित्रोरूर्ध्वगमनानन्तरमेव दायविभाजनसमयस्य निर्धारणमावश्यकं दृश्यते । अनेन न्यायेन सर्वेऽपि नैपालकाः सुखिनः सन्तुष्टाश्च भवन्तीति निष्कर्षः ।

**सन्दर्भसामग्रीसूची**

काणे, पाण्डुरङ्गवामनः (ई.१९७३), *धर्मशास्त्रका इतिहास*, सेन्ट्रल प्रेस चौलक्खी ।
त्रिपाठी, सुन्दरलालजी (सम्पा.), (२०१८), *अष्टादशस्मृतिः* , खेमराज श्रीकृष्णदास प्रकाशन ।
भट्टः, नीलकण्ठ (ई. १९८५), *व्यवहारमयूखः*, चौखम्बा संस्कृत प्रतिष्ठान ।
मनुः (२०५७), *मनुस्मृतिः*, चौखम्बा संस्कृत संस्थान ।
मित्रमिश्रः (वि.सं.१९८९), *वीरमित्रोदयः* (व्यवहारप्रकाशः), चौखम्बा संस्कृत सिरिज ।
याज्ञवल्क्यः (२०५०), *याज्ञवल्क्यस्मृतिः*, चौखम्बा संस्कृत संस्थान ।
लक्ष्मीधर (ई.१९५३), *कृत्यकल्पतरु* (व्यवहार काण्ड), युनिभर्सिटी बरोदा ।
विष्णुगुप्तः (वि.सं.२०१९), *कौटिल्य अर्थशास्त्र,* चौखम्बा विद्याभवन ।